National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(54): 205-206
© 2024 NJHSR
www.sanskritarticle.com

**डॉ. रामडुगु श्रीधरः**
अतिथि अध्यापकः,
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**डॉ. रामडुगु श्रीधरः**
अतिथि अध्यापकः,
ज्योतिषवास्तुविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# अयनांशतत्त्वविवेकानुसारं अयनांशस्वरूपम्

**डॉ. रामडुगु श्रीधरः**

**अयनांशस्वरूपम्**

पश्चात् ग्रन्थस्यास्य मुख्यप्रमेयत्वात् ग्रन्थस्यादितः **अयनांशस्वरूपम्** व्याचष्टे यथा

**अथाक्षितुल्यायनभागलक्ष्म निगद्यते शिष्यगणस्य तुष्ट्यै[1]॥**

**यज्ज्ञानतश्शिष्यगणस्य बुद्धिर्विकासमाप्नोत्यचिरेण सम्यक्।**
**अश्विन्यादेस्सायनांशाजवक्त्रपर्यन्तं ये क्रांतिवृत्ते लवास्स्युः॥**
**तेंऽशाः प्रोक्ताश्चायनांशाश्चलाशा भागाश्चेत्यप्यन्तरांशाः पुराणैः॥ इति**

अश्विन्यादेः (निरयनमेषादेः) सायनंशजवक्त्रपर्यन्तं क्रान्तिवृत्ते ये लवाः स्युः ते अंशाः अयनांशाः इति वा चलांशाः इति वा अन्तरांशाः इति वा भागाः इत्यपि वा पुराणैः प्रोक्ता भवन्ति।

**अश्विन्यादिः**

तदनु अश्विन्यादिं कथयति यथा-

**अश्विन्यादिर्निश्चलांशाजवक्त्रं मेषादिश्चेत्युच्यते सुस्थिरोऽयम्[2]।**

**नाश्विन्यादिर्ज्ञायते साम्प्रतं तु पारम्पर्येणोपदेशस्य नाशात्॥**

**यस्मात्तत्र व्यञ्जकस्याप्यभावाद्वेधेनापि ज्ञायते नैव तस्मात्।**

अश्विन्यादिः( निरयनाश्विन्यादिः) मेषादिश्च निश्चलांशाजवक्त्रम् ( निरयणमेषादिः ) इत्युच्यते। अयं सुस्थिरा भवति। पारम्पर्येण उपदेशस्य नाशात् साम्प्रतं तु अश्विन्यादिः न ज्ञायते। यतः तत्र द्योतकस्य अभावात् वेधकर्मणामपि विज्ञानस्याभावाच्च।

**सायनमेषादिः**

पश्चाद् कृतावस्यां सायनमेषादिमधिकृत्य विवृणोति यथा -

**नाडीवृत्तक्रांतिवृत्तैक्यबिन्दुरुक्तो ऽजादिस्सायनश्चंचलोऽयम्[3]॥**

**बिंदुश्चायं प्रोच्यते क्रान्तिपातस्संपातोऽयं सायनं मेषवक्त्रम्॥**
**अद्याहिर्बुध्न्यर्क्षसंस्थस्त्विति स्म ज्ञातुं शक्यस्तत्र कस्मिन् लवादौ॥**
**संस्थश्चायं चेति विज्ञातुमद्य नैवास्ति स्म यस्य कस्यापि शक्तिः।**
**किंचाश्व्यादिज्ञानवैकल्यतश्चाहिर्बुन्ध्यर्क्षस्यादिरप्यप्रसिद्धः॥**

प्राक्क्षितिजे विद्यमानः नाडीवृत्तक्रान्तिवृत्तैक्यबिन्दुः अजादिः अर्थात् सायन मेषादिरिति कथ्यते। अयं सायनः चञ्चलो भवति। अयं बिन्दुः क्रान्तिपात इति च प्रोच्यते। संपातोऽयं मेषवक्त्रम् सायनमेषादिरिति च प्रोच्यते। नवीनाः सायनमेषादिं वसन्तसंपात इति वा वसन्तविषुवम् इति वा कथयन्ति। अद्य तावत् सायनमेषादिः तु अहिर्बुध्न्यर्क्षसंस्थायाम् ( उत्तरभाद्रानक्षत्रे ) विद्यते इति ज्ञातुं शक्यते। परन्तु तत्र संस्थायामस्यां कस्मिन् लवे ( अंशे ) कस्मिन् लिप्ते ( कलायाम् ) भवतीति विज्ञातुं नैव प्रभवामः। अश्विन्यादिज्ञानवैकल्यात् अहिर्बुध्न्यर्क्षस्य आदिरपि अप्रसिद्धो भवति। **धनायनांशसद्भावकालगोलस्थितिः**

तदनु ग्रन्थेऽस्मिन् धनायनांशसद्भावकालगोलस्थितिः प्रोच्यते। तत्र तदङ्गतयादौ अनांशसद्भावकालः विव्रियते यथा -

**यस्मिन्काले स्थिताश्चायनांशास्संप्रोच्यते त्विह[4]।**

**चलांशसद्भावकाल इति तच्छास्त्रकर्तृभिः ॥**

**मेषादिर्निश्चलांशश्च मेषादिस्सायनस्तथा।**

**क्रांतिवृत्ते स्थितावेतावयनांशांतरे तदा॥**

**रव्यादिग्रहसंक्रान्ती सायनासायनांशजे।**

**चलांशसिद्धदिवसांतरिते भवतस्तदा ॥** इति

यस्मिन् काले अयनांशाः स्थिताः भवन्ति सः कालः ज्योतिश्शास्त्र-कर्तृभिः चलांशसद्भावकालः इति संप्रोच्यते। निश्चलांशः मेषादिश्च तथा मेषादिः सायनः अयनांशान्तरे क्रान्तिवृत्ते स्थितौ। तदा रव्यादिग्रहसायननिरयनसंक्रमाः चलांशतुल्यादिवसान्तरिते भवन्ति। अयनांशसद्भावकालविवरणादनु धनायनांशसद्भावकालगोलस्थितिः कथ्यते यथा -

**प्राग्भ्रमे क्रान्तिवृत्तस्य मेषादिस्सायनांशकः[5]।**

**मेषादेर्निश्चलांशस्य पश्चिमे स्यात्तु सर्वदा ॥**इति

क्रान्तिवृत्तस्य प्राग्भ्रमणे सायनांशकः मेषादिः तु सर्वदा निश्चलांशस्य मेषादेः पश्चिमे स्यात् तदा धनायनांशसद्भाव-कालगोलस्थितिः भवति। एतदेव धनायनांशाः इति कथ्यन्ते। इमान् धनायनांशान् ग्रहेषु संयोजयेत्। अयनांशाः धनात्मकाः यदा भवन्ति तदा सायणसंक्रमणानि निरयनसंक्रमेभ्यः पूर्वं हि भवन्ति।

**<u>ऋणायनांशसद्भावकालगोलस्थितिः</u>**

पश्चाद् ग्रन्थेस्मिन् ऋणायनांशसद्भावकाल गोलस्थितिः परामृश्यते यथा -

**धनात्मिकाश्चायनांशास्संभवन्ति तदैव हि[6]।**

**पश्चिमभ्रमणे क्रान्तिमंडलस्य च सायनः ॥**

**मेषादिर्निश्चलांशस्य मेषादे: पूर्वतो भवेत् ।**

**ऋणत्मिकाश्चायनांशास्संभवन्ति तदा ध्रुवम् ॥**

**खेचरेषु च योज्यन्ते चायनांशा धनात्मिकाः ।**

**ऋणात्मिका विशोध्यन्ते खेचरेभ्योऽयनांशकाः॥**

क्रान्तिमण्डलस्य पश्चिमभ्रमणे सायनः मेषादिः निश्चलांशस्य मेषादेः पूर्वतः यदा भवति तदा ऋणात्मिकाः अयनांशाः ध्रुवं संभवन्ति। धनात्मिकाः अयनांशाः खेचरेषु योज्यन्ते। परन्तु ऋणात्मिकाः अयनांशकाः खेचरेभ्यः विशोध्यन्ते च। अयनांशाः ऋणात्मकाः यदा भवन्ति तदा सायणसंक्रमणानि निरयनसंक्रमेभ्यः परं हि भवन्ति।

**<u>अयनाभावकालिकगोलस्थितिः</u>**

परं ग्रन्थेऽस्मिन् अयनाभावकालिकगोलस्थितिः सुष्ठु प्रस्तूयते यथा -

**नाडीवृत्तं क्रांतिवृत्तस्थदस्रभादौ सक्तं चायनाभावकाले[7]।**

**सम्यक्संस्थौ सायनासायनाजवक्त्रावेकस्मिन्हि बिन्दौ तदानीम्॥**

**भागाभावस्सायनासायनाजवक्त्रैक्यात्संजायते स्पष्टमेव।**

**तस्मिन्काले सायनासायनार्कसंक्रांती द्वे चैककाले भवेताम्॥**

**एवं सर्वेषां ग्रहाणां भवेतां संक्रांती अप्येककाले तदानीम्।**

**यथा यथा चायनांशवृद्धिस्स्यात्तु तथा तथा॥**

**तौ मेषादी चायनांशदूरे हि भवतस्सदा ॥**

**यथा यथा चायनांशक्षयस्स्यात्तु तथा तथा।**

**तावासन्नौ भवेतां हि मेषादी क्रमशस्तदा॥**

अयनाभावकाले नाडीवृत्तं क्रान्तिवृत्तस्थाश्विन्यादौ सक्तं भवति। तदानीम् एकस्मिन् एव बिन्दौ सायननिरयणमेषादी सम्यग् संस्थौ भवेताम्। अयनांशाभावः सायनासायनाजवक्त्रैक्यात् स्पष्टमेव सञ्जायते। तस्मिन्काले सायनसंक्रान्तिः निरयण र्कसंक्रान्तिश्च एककाले भवेताम्। तदानीम् एवमेव सर्वेषामपि ग्रहाणां सायननिरयणसंक्रान्ती अपि एककाले भवेताम्। अयनांशवृद्धिस्तु यथा यथा स्यात् तथा तथा तौ सदा अयनांशदूरे एव भवतः। अयनांशक्षयस्तावत् येन प्रकारेण भवति तेनैव प्रकारेण तदा आसन्नौ तौ सायननिरयनमेषादी क्रमशः भवेताम्।

**उपयुक्तग्रन्थसूची**


1. सूर्यसिद्धान्तः
2. अयनांशतत्त्वविवेकः
3. सिद्धान्तशिरोमणिः
4. केतकीग्रहगणितम्
5. ज्योतिर्विज्ञानम्
6. सिद्धान्ततत्त्वविवेकः
7. भारतीयज्योतिषशास्त्रेतिहासः


**संदर्भः**

[1] अ.त.वि.प्र.अ.श्लो.सं. ७२-७३

[2] अ.त.वि.प्र.अ.श्लो.सं. ७४

[3] अ.त.वि.प्र.अ.श्लो.सं. ७५-७७

[4] अ.त.वि.प्र.अ.श्लो.सं. ७८-८०

[5] अ.त.वि.प्र.अ.श्लो.सं. ८१

[6] अ.त.वि.प्र.अ.श्लो.सं. ८२-८४

[7] अ.त.वि.प्र.अ.श्लो.सं. ८५-८८